सहसा बोधयेन्नैव नायोग्यमुपवेशयेत् ॥”
अयोग्यमुपवेशनासमर्थम् ।
“नाङ्कस्य स्थापयेत् क्रोडे न क्षिप्रं शयने क्षिपेत् ।
रोदयेन्न क्वचित् कार्य्यं विधिमावश्यकं विना ॥”
आवश्यको विधिः भेषजदानतैलाभ्यङ्गोद्वर्त्तनादि॥
तच्चित्तमनुवर्त्तेत तं सदैवानुमोदयेत् ।
संसेवितमना एवं नित्यमेवाभिवर्द्धयेत् ॥
बालातपतडिद्वृष्टिधूमानलजलादितः ।
निम्नोच्चस्थानतश्चापि रक्षेद्बालं प्रयत्नतः ॥”
बालस्य स्वभावाद्धितान्याह ।
“अभ्यङ्गोद्वर्त्तने स्नानं नेत्रयो रञ्जनं तथा ।
वसनं मृदु यत्तच्च तथा मृद्वनुलेपनम् ॥
जन्मप्रभृति पथ्यानि बालस्यैतानि सर्व्वथा ॥”
बालस्य कवलादेः समयमाह ।
“कवलः पञ्चमाद्वर्षाद्विंशतेश्चैव मैथुनम् ॥”
बाल्यादेरवधिमाह सुश्रुतः ।
“वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा ।
ऊनषोडशवर्षस्तु नरो बालो निगद्यते ॥
त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्नभुक् ॥
दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्द्वयम् ।
तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः ॥
मध्यो षोडशसप्तत्योर्मध्यमः कथितो बुधैः ।
चतुर्द्धा मध्यमं प्राहुर्युवा द्वात्रिंशतो मतः ॥
चत्वारिंशत्समा यावत्तिष्ठेद्वीर्य्यादिपूरितः ।
ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः ॥
वीर्य्यादीत्यादिशब्देन रसादिसर्व्वधात्विन्द्रियबलोत्साहा उच्यन्ते । क्षीणः सर्व्वधात्विन्द्रियबलोत्साहैर्हीनः ।
ततस्तु सप्ततेरूर्द्धं क्षीणधातुरसादिकः ॥
क्षीयमाणेन्द्रियबलः क्षीणरेता दिने दिने ।
वलीपलितखालित्ययुक्तः कर्म्मसु चाक्षमः ॥
कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ॥
बाल्ये विवर्द्धते श्लेष्मा पित्तं स्यान्मध्यमाब्दिकम् ।
वार्द्धक्ये वर्द्धते वायुर्विचार्य्यैतदुपक्रमेत् ॥
उपक्रमेत् चिकित्सेत् ॥ तन्त्रान्तरे तु ।
बाल्यं वृद्धिश्छविर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ ।
बुद्धिः कर्म्मेन्द्रियं रेतो जीवितं दशतो ह्रसेत् ॥”
इति भावप्रकाशः ॥

(अथ बालाद्यशौचम् ।
“नवमादिमासजातबालस्याशौचकालाभ्यन्तरमरणे मातापित्रोरशुचित्वं युक्तम् । तदेव स्वजातुक्तजननाशौचम् । ज्ञातीनान्त्वशौचं नास्ति । नवमादिमासम्भूतजातयोस्तु कन्यापुत्रयोः पित्रादि सपिण्डानां मातुश्च जननाशौचम् । तच्च ब्राह्मणानां दशाहं शूद्राणां मासः । पुत्रजन्मनि पितुः सचेलस्नानं पुत्रमुखदर्शनात् परं पुनः सचेलस्नानम् । पुत्रकन्याजनने ब्राह्मण्या दशाहानन्तरं लौकिककर्म्माधिकारः॥ पुत्रजनने ब्राह्मण्या विंशतिरात्रोत्तरस्नानात् वैदिककर्म्माधिकारः । कन्याजनने तु ब्राह्मण्या मासोत्तरस्नानात् वैदिककर्म्माधिकारः । शूद्रायाः कन्यापुत्रजनने त्रयोदशाहोत्तरं लौकिककर्म्माधिकारः वैदिककर्म्मणि तु मासोत्तरस्नानात् शुद्धिः । एतत् सर्व्वं कन्यापुत्रयोर्विद्यमानत्वे बोध्यम् ॥

जननाशौचोत्तरं षण्मासाभ्यन्तरमजातदन्तमरणे मातापित्रोरेकाहः । सपिण्डानान्तु सद्यः शौचम् ॥ षण्मासाभ्यन्तरेऽपि जातदन्तस्य मरणे मातापित्रोस्त्र्यहः । सपिण्डानामेकाहः । षण्मासोपरिद्विवर्षपर्य्यन्तं पित्रोस्त्र्यहः । सपिण्डानामकृतचूडे एकाहः कृतचूडे त्र्यहः । द्विवर्षोपरिमासत्रयाधिकषड्वर्षपर्य्यन्तमनुपनीतबालकस्य मरणे मातापित्रादिसपिण्डानां त्र्यहः ॥ तन्मध्येऽप्युपनीतस्य मरणे दशाहः । मासत्रयाधिकषड्वर्षोपरि मरणे पित्रादिसपिण्डानां दशाहः ॥

शूद्रस्य षण्मासाभ्यन्तरे अनुत्पन्नदन्तस्य मरणे त्रिरात्रम् । उत्पन्नदन्तस्य पञ्चाहः । षण्मासोपरिद्विवर्षाभ्यन्तरे अकृतचूडमरणे पञ्चाहः । तत्रापि कृतचूडमरणे द्वादशाहः । द्विवर्षोपरि षड्वर्षाभ्यन्तरे मरणे द्वादशाहः । अत्रापि कृतोद्वाहेऽपि मासो व्यवह्रियते षड्वर्षोपरिमासः ॥ * ॥ “बालकजननान्तरकर्त्तव्यमाह वैद्यके । यथा,—“अथबालं क्षौमपरिवृतं क्षौमवस्त्रास्तृतायां शय्यायां शाययेत् । पीलुबदरीनिम्बपरूषकशाखाभिश्चैनं वीजयेत् । मूर्द्ध्नि चास्याहरहस्तैलपिचुमवचारयेत् । धूपयेच्चैनं रक्षोघ्नैर्धूपैः । रक्षोघ्नानि चास्य पाणिपादशिरोग्रीवास्ववसृजेत् तिलातसीसर्षपकणांश्चात्र प्रकिरेत् । अधिष्ठाने चाग्निं प्रज्वालयेत् । व्रणितोपासनीयञ्चावेक्षेत ॥ ततो दशमेऽहनि मातापितरौ कृतमङ्गलकौतुकौ स्वस्तिवाचनं कृत्वा नाम कुर्य्यातां यदभिप्रेतं नक्षत्रनाम वा ॥

ततो यथावर्णं धात्रीमुपेयात् मध्यमप्रमाणां मध्यमवयसमरोगां शीलवतीमचपलामलोलुपामकृशामस्थूलां प्रसन्नक्षीरामलम्बौष्ठीमलम्बोर्द्ध्वस्तनीमव्यङ्गामव्यसनिनीं जीवद्वत्सां दोग्ध्रीं वत्सलामक्षुद्रकर्म्मिणीं कुले जातामतो भूयिष्ठैश्च गुणैरन्वितां श्यामामारोग्यबलवृद्धये बालस्य । तत्रोर्द्ध्वस्तनी करालं कुर्य्यात् । लम्बस्तनी नासिकामुखं छादयित्वा मरणमापादयेत् । ततः प्रशस्तायां तिथौ शिरःस्नातमहतवाससमुदङ्मुखं शिशुमुपवेश्य धात्रीं प्राङ्मुखीमुपवेश्य दक्षिणं स्तनं धौतमीषत्परिस्रुतमभिमन्त्र्य मन्त्रेणानेन पाययेत् ।
चत्वारः सागरास्तुभ्यं स्तनयोः क्षीरवाहिणः ।
भवन्तु सुभगे नित्यं बालस्य बलवृद्धये ॥
पयोऽमृतरसं पीत्वा कुमारस्ते शुभानने ।
दीर्घमायुरवाप्नोतु देवाः प्राश्यामृतं यथा ॥
अतोऽन्यथा नानास्तन्योपयोगस्यासात्म्यात् व्याधिजन्म भवति । अपरिस्रुतेऽप्यतिस्तब्धस्तन्यपूर्णस्तनपानादुत्क्षुहितस्रोतसः शिशोः कासश्वासवमीप्रादुर्भावः । तस्मादेवं विधानं स्तन्यं न पाययेत् ॥”
“बालं पुनर्गात्रसुखं गृह्णीयान्न चैनं तर्ज्जयेत् सहसा न प्रतिबोधयेद्वित्रासभयात् सहसा नापहरेदुत्क्षिपेद्वा वातादिविघातभयान्नोपवेशयेत् कौब्जभयात् नित्यञ्चैनमनुवर्त्तेत प्रियशतैरजिघांसुः । एवमनभिहतमनास्त्वभिवर्द्धते नित्यमुदग्रसत्त्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च भवति । वातातपविद्युत्प्रभापादपलताशून्यागारनिम्नस्थानगृहच्छायादिभ्यो दुर्ग्रहोपसर्गतश्च बालं रक्षेत् ।
नाशुचौ विसृजेद्बालं नाकाशे विषमे न च ।
नोष्ममारुतवर्षेषु रजोधूमोदकेषु च ॥
क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा ।
दद्यादास्तन्यपर्य्याप्तेर्बालानां वीक्ष्य मात्रया ॥”
इति सुश्रुते शारीरस्थाने दशमेऽध्याये ॥)

बा(वा)लः, पुं, (बलति मस्तकं रक्षति संवृणोतीति वा । बल+णः ।) शिरोभवाच्छादनविशेषः । चुल इति भाषा । तत्पर्य्यायः । चिकुरः २ कचः ३ केशः ४ कुन्तलः ५ कुन्नरः ६ शिरोरुहः ७ शिरसिरुट् ८ शिरोरुट् ९ शिरजः १० । इति शब्दरत्नावली ॥ घोटकशिशुः । तत्पर्य्यायः । किशोरः २ । इत्यमरः ॥ अश्ववालधिः । करिवालधिः । नारिकेलः । इति मेदिनी । ले, ३६ ॥ पञ्चवर्षीयहस्ती । यथा,—
“पञ्चवर्षो गजो बालः स्यात् पोतो दशवर्षकः ॥”
इति हेमचन्द्रः ॥
(यथा, भागवते । ९ । १० । ६ ।
“यो लोकवीरसमितौ धनुरैशमुग्रं
सीतास्वयंवरगृहे त्रिशतोपनीतम् ।
आदाय बालगजलील इवेक्षुयष्टिं
सज्ज्यीकृतं नृप ! विकृष्य बभञ्ज मध्ये ॥”)
पुच्छः । इति शब्दरत्नावली ॥ (यथा, कुमारे । १ । ४८ ।
“लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्वालप्रियत्वं शिथिलं चमर्य्यः ॥”)
मत्स्यविशेषः । इति शब्दचन्द्रिका ॥

बालकं, क्ली, (बाल+स्वार्थे कन् ।) ह्रीवेरम् । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—
“बालकं शीतलं रुच्यं लघुदीपनपाचनम् ।
हृल्लासारुचिवीसर्पहृद्रोगामातिसारजित् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अङ्गुलीयकम् । पारिहार्य्यम् । इति विश्वः ॥

बालकः, पुं, (बाल एव । बाल+स्वार्थे कन् ।) शिशुः । (यथा, मार्कण्डेये । ५१ । ५३ ।
“भूतानां मातृभिः सार्द्धं बालकानान्तु शान्तये ॥”)
अश्वः । हयबालधिः । हस्तिबालधिः । अङ्गुरीयकम् । ह्रीवेरम् । वलयम् । इति मेदिनी । के, १५७ ॥ केशः । इति विश्वः ॥ * ॥